# International Research Journal of Management Science & Technology

**ISSN 2250 – 1959(0nline)**
**2348 – 9367 (Print)**

*An Internationally Indexed Peer Reviewed & Refereed Journal*

www.IRJMST.com
www.isarasolutions.com

Published by iSaRa Solutions

# भागवतानुसारं भक्तेः वैविध्यम्

**Mampi Das**
Research Scholar
Central Sanskrit University, Ekalavya Campus
Agartala west Tripura

प्राचीनभारतीयज्ञानपरम्परायाः अनूपमं वैचित्र्यमयं रूपं दृश्यतैव। तत्र ज्ञानविज्ञानचिन्तनेषु नव-नवोन्मेषः परिलक्ष्यते स्म। यथा कर्मवादस्य जन्मान्तरवादस्य च माध्यमेन धर्म अर्थ-काम मोक्षः च चतुर्विधां पुरुषार्था प्राप्नुवन्ति स्म। पारलौकिकं लौकिकञ्च भोगसाधनस्य त्यागस्य च समन्वयं वर्तते। ऋग्वेद्कालात् भारतीयशिक्षाप्रणाल्यां नैतिकं भौतिकम् आध्यात्मिकं बौद्धिकञ्च मूल्याधारितं भूत्वा अग्रे स्मरन्ति स्म। वेदेषु मानवानां श्रेष्ठता स्वीकृता वर्तते । शिक्षाप्रणाल्यां भौतिक आध्यात्मिकज्ञानानां विकासाय बलं प्रददाति स्म। यत् बन्धनात् विमुच्यते एवञ्च मुक्तेः मार्गं दर्शयते।

गुरुकूलं शिक्षायाः प्रमुखाः आधारस्तम्भाः आसन् शिक्षार्थिनः । अष्टादशविद्याः यथा षड्वेदाङ्गानि चत्वारः वेदाः, चत्वारः उपवेदाः, मीमांसा, न्यायः, पुराणं तथा धर्मशास्त्रञ्च । अत्र भारतीयज्ञानविज्ञानस्याकरः वर्तते। तेषु अन्यतमा भवति भक्तिः। या भारतस्य प्रतिष्ठा, तया देशेषु विदेशेषु च अधुनापि मानवानां कृते शीलतां स्निग्धतां प्रदीयते।

**भक्तेः स्वरूपम्** –

वेदेषु शास्त्रेषु पुराणेषु गीतादिषु ग्रन्थेषु च भिन्नैः प्रकारैः भक्तिविषये वर्णनम् अस्ति। भक्तेः नवधा विभागाः सन्ति, ताः यथा- प्रेमभक्तिः, साधनभक्तिः, देशभक्तिः, मातृभक्तिः, गुरुभक्तिश्च इत्यादयः। एतासु भक्तिषु बहुभक्तयः सन्ति, यथा ताभिः देश-मातृ-पितृ-गुरु-देवतादिषु ग्रन्थेषु सन्दर्भेषु च परिभाषितमस्ति। किन्तु मनसि प्रश्न उदेति यत् मूलरूपेण भक्तिः का अस्ति ? भक्तेः परिभाषा का? भक्तिशब्दस्य अर्थः कः?

यथा भक्तिः शब्दस्य अर्थः भज् धातौ क्तिन् प्रत्यययोजनेन भक्तिशब्दस्य निर्माणं भवति। भज् सेवायां भज् धातोः शब्दस्य अर्थः सेवाकरणम्। अतः भक्तिशब्दस्य अर्थो भवति सेवाकरणम्। कस्य सेवाकरणीयः? यां प्रति भवन्तः भक्तिं कुर्वन्ति। स्वस्य आराध्यस्य अर्थात् आराध्यरूपेण देश-मातृ-गुरुदेवाश्च इत्यादयः भवितुम् अर्हन्ति। यथा- देशस्य सेवाकरणं देशभक्तिः, मातुः सेवाकरणं मातृभक्तिः, पितुः सेवाकरणम् पितृभक्तिः इत्यादयः।

भक्तिः का अस्ति 'भजनं भक्तिः' अर्थात् आराध्यस्य भजनं भक्तिरस्ति। भजनम् इति शब्दः 'भज्' धातुना निष्पन्नो अस्ति। यस्य अर्थो भवति सेवाकरणम्। भजनरूपी सेवा शरीरात् आरभ्य हृदयपर्यन्तं भवति। अस्यां भजनरूपसेवायां नाम गुण लीला च इत्यादीनां गानं भवति। यथा देशभक्त्यां काचित् सेवा शारीरिकी भवति। यथा नीतिनिर्माणादि मार्गनिर्माणादि काचित् सेवा मानसिकी भवति। देशस्य जयं भवतु इति नाम्ना ग्रहणं क्रियते। अस्माकं देश एतादृशः विद्यते। वयम् अस्य देशस्य निवासीनः स्मः। एवं रूपेण देशस्य गुणानां गानं गायामः। तथा च अस्माकं देशे एवं प्रकारेण यत् यत् भवति तत् लीलागानं भवति।

अनेन प्रकारेण ईश्वरभक्तिः गुरुभक्तिः पितृभक्तिश्च भवन्ति। यथा **जय श्री राम इति** तेषां गुणगानं क्रियते। तथा च लीलागानम् अपि भवति। यथा भजते गोस्वामी तुलसीदासेन विरचितः, श्रीरामस्य आरतिगानं क्रितते। तद्याथा-

**"श्री रामचन्द्र कृपालु भजु मन हरण भवभय दारुण।**

**नवकंज लोचन, कंज-मुख, कर-कंज, पदकंजारूणा।।"**[1]

भक्तिशब्दस्य व्युत्पत्तिः 'भज्' धातुना निष्पन्नो भवति। यस्य अर्थः सेवाकरणं भजनकरणं वा भवति। अर्थात् श्रद्धया प्रेम्ना सह इष्टदेवतां प्रति आसक्तिः भवति। नारदभक्तिसूत्रे भक्तिस्वरूपविषये उल्लेखितमस्ति यत् भक्तिः परमप्रेमरूपा अमृतस्वरूपा च। एतां भक्तिं प्राप्य मनुष्यः संतृप्तः अमरश्च भवति। महर्षिना व्यासेन उक्तं यत् पूजां प्रति मानवानां यः अनुरागोऽस्ति, तदेव भक्तिः उच्यते। गर्गानुसारेण कथाश्रवणे अनुरुक्तिरेव भक्तिः भवति। भारतीयधार्मिकसाहित्ये भक्तेः उदयस्तु वैदिककालाद् दृश्यमानो वर्तते।

अर्थात् भक्तिरेव भजनम् अस्ति। कस्य भजनम्? ब्रह्मणः महतः। महान् सः वर्तते यत् चेतनास्तरे मूर्धन्यम् अस्ति। यज्ञेषु यज्ञः अस्ति येषु पुजनीयः अस्तिपुजनी, स्वात्वतेषु सत्वसम्पन्नेषु च शिरोमणिः अस्ति। एवञ्च एकरूपं भुत्वा अपि अनेकेषां शासकरूपेण कर्मफलदातारूपेण भक्तानामावश्यकतानुगुणं पूर्णं करोति।

**श्रीमद्भागवते नवधाः भक्तितत्त्वानि –**

प्राचीनेषु शास्त्रेषु भक्तेः नवविधप्रकाराः उल्लेखिताः। यथा उच्यते –

**"श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।**

**अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।।"**[2]

---

[1] विनयपत्रिका श्रीरामस्तुतिः85

[2] गीता 7.5.23

श्रवणं (परीक्षितः), कीर्तनं (शुकदेवः), स्मरणं (प्रह्लादः), पादसेवनम् (लक्ष्मी), अर्चनं (पृथुराजा), वन्दनम् (अक्रूरः), दास्यं (हनुमान्), सख्यम् (अर्जुनः), एवं आत्मनिवेदनं (बलिराजा) एताः नवधाः भक्तयः सन्ति।

**श्रवणम्-**

ईश्वरस्य लीला, कथा, शक्तिः, महत्वम्, स्त्रोतश्च इत्यदिनां परमश्श्रद्धया अतृप्तेन मनसा च निरन्तरं श्रवनकरणम्।

**कीर्तनम्** –

ईश्वरस्य गुण-नाम-चरित्र-पराक्रमादिनां आनन्देन उत्साहेन च कीर्तनकरणम्।

**स्मरणम्** –

निरन्तरेण अनन्यभावेन परमेश्वरस्य स्मरणम्। तस्य ईश्वरस्य माहात्मं शक्तिञ्च स्मरित्वा तस्मिन् स्तरे मुग्धो भवेत्।

**पादसेवनम्-**

ईश्वरस्य चरणमाश्रित्य चिन्तनम्।

**अर्चनम्** –

मनसा, वाचा, कर्मणा च पवित्रसामग्र्यैः ईश्वरस्य चरणयोः पूजनं करणम्।

**वन्दनम्-**

भगवतः प्रतिमास्वरूपेन अंशरूपेन च व्याप्तिनां आचार्य-पिता-माता-गुरुजन-ब्राह्मण-भक्तजनादिनां कृते अथवा परमादरसत्कारेण पवित्रभावेन च सार्द्धं नमस्कारकरणम्, तस्य (ईश्वरस्य) सेवाकरणम्।

**दास्यम्-**

ईश्वरं स्वामी एवं स्वस्य सेवकः इति विचिन्त्य परमश्रद्धया सेवाकरणम्।

**सख्यम्-**

ईश्वरस्य इव स्वस्य परममित्ररूपेण विचिन्त्य स्वस्य सर्वस्वं तेभ्य ईश्वरेभ्यः समर्पणं तथा च सत्भावेन स्वकीयपापपुण्येन निवेदनकरणम्।

**आत्मनिवेदनम्-**

स्वस्य सर्वं भगवतः चरणकमलयोः सदा पर्यन्तं सम्पुर्णतया समर्पणीयम्। एवं कापि स्वस्य स्वतन्त्रसत्त्वा न स्थापनिया। यां सर्वस्मात् उत्तमाम् अवस्थां चिन्तितामस्ति।

**श्रीमद्भगवद्गीतायां नवधा भक्तिः-**

**"कथिता नवधा भक्तिः श्रवणादिस्वरूपिणी।**

**यया कयाऽपि संयुक्तो हरिं प्राप्नोति मानवः॥"**[3]

श्रीमद्भगवद्गीतायां साधनभक्तेः नवधाभक्तिः कतिथा। यत् नवधाभक्तेः नाम्ना प्रसिद्धा वर्तते। गीतायां भगवान् कृष्णः अस्याः नवधाभक्तेः क्रमेण वर्णनं तु न कृतवान्। किन्तु भगवतः वाक् तु यतावत् विलक्षणम् अस्ति यत् अस्मिन् अन्यैः साधनैः सः नवधाभक्तेः अपि वर्णनमागतमस्ति। यथा-

**श्रवणम्-**

ये मनुष्याः तत्त्वज्ञ-जीवन्मुक्त-महापुरुषानां वचनं श्रुत्वा उपासनां कुर्वन्ति। ते मनुष्याः एवं रूपेण श्रुत्वा मृत्युं तरन्ति।[4]

**कीर्तनम्-**

ये भक्ताः प्रेमपूर्वकं मम नाम-रूपलीलादिनां[5] कीर्तनं कुर्वन्ति। हे हृषीकेश भवतः नामरूपादिनां कीर्तनं करणेन इदं सम्पुर्णं जगत्, आनन्दितं जायमानम् अस्ति।

**स्मरणम्-**

ये मनुष्याः अनन्यचित्तरूपेण नित्यनिरन्तरं मम स्मरणं कुर्वन्ति।[6] ये महात्मनः अनन्यरूपेण मम स्मरणं कुर्वन्तः मम उपासनां कुर्वन्ति,[7] भवान् निरन्तरं मयी चित्तं स्थापयतु[8] कारणं मयी एवं चित्तरूपं भवति चेत् मम कृपया सम्पूर्णेभ्यः विघ्नेभ्यः तरणं भविष्यति।[9]

---

[3] गीतादर्पन page no-183

[4] श्रीमद्भागवत्गीता 25/13

[5] श्रीमद्भागवत्गीता 14/9

[6] श्रीमद्भागवत्गीता 14/8

[7] श्रीमद्भागवत्गीता 13/9

[8] श्रीमद्भागवत्गीता 57/18

[9] श्रीमद्भागवत्गीता 58/18

**पादसेवनम्-**

सर्वे भक्ताः प्रेमपूर्वकं मां नमस्कारं कुर्वन्तु, मम उपासनां कुर्वन्तु।[10]

**अर्चनम्-**

यस्मात् सम्पूर्णप्राणीनाम् उत्पत्तिः जायते अपि च यत् सर्वस्मिन् व्याप्तः वर्तते। तस्य परमात्मनः स्वकीयेन कर्मणा अर्चनं कृत्वा (पूजनम्) मनुष्यः सिद्धिं प्राप्नोति।[11] अथवा भवान् मम पूजनं करोतु, पुनः भवान् मामैव प्राप्नोति।[12]

**वन्दनम्-**

भवान् माम् नमस्कारं कुरुः, पुनः भवान् मामैव प्राप्नोति हे भगवान्। भवन्तं एकसहस्रवारं नमस्कारं भवतु। नमस्कारं भवतु। एवं पुनः भवन्तं वारंवारं नमस्कारं भवतु ! भवतु![13] हे सर्वात्मन् ! भवन्तं पुरस्तात् पश्चात् नमस्कारं भवतु।[14] हे भगवन्। अहं भवन्तं शरीरेण दण्डवतरूपेण प्रणम्य प्रसन्नं कारयितुम् इच्छामि।[15]

**दास्यम्-**

भवान् मम सेवकः भवतुपुनः भवान् माम् एव प्राप्नोति,[16] हे, कृष्ण! अहं भवतां सेवकोऽस्मि।[17]

**सख्यम्-**

भवान् मम प्रियमित्रं वर्तते।[18] हे कृष्ण। यथा मित्रं मित्रस्य अपमानं सहनं करोति अर्थात् क्षमां करोति, एवमेव भवान् मया कृतम् अपमानं सहने समर्थः भवति।[19]

**आत्मनिवेदनम्-** तस्य आदिपुरुषस्य परमात्मनः शरणे एव गन्तव्यः,[20] भवान् सर्वभावेन तस्य अन्तर्यामी परमात्मनः शरणे गन्तव्यम्,[21] भवान् सर्वधर्माश्रयं परित्यज्य केवलं मम एव शरणे आगच्छ।[22]

---

[10] श्रीमद्भागवत्गीता 14/9

[11] श्रीमद्भागवत्गीता 18/46

[12] श्रीमद्भागवत्गीता 09/34

[13] श्रीमद्भागवत्गीता 39/11

[14] श्रीमद्भागवत्गीता 40/11

[15] श्रीमद्भागवत्गीता 44/11

[16] श्रीमद्भागवत्गीता 65/18,34/9

[17] श्रीमद्भागवत्गीता 7/2

[18] श्रीमद्भागवत्गीता 3/4

[19] श्रीमद्भागवत्गीता 44/11

[20] श्रीमद्भागवत्गीता 4/15

अनेन प्रकारेण उयपुक्तेषु स्थलेषु भगवान् साधनभक्तैः वर्णनं कृतम्। एवं संसिद्धिं परमां गताः।[23] मद्भक्तिं लभते परां।[24] भक्तिं मयि परां कृत्वा।[25] एतेषु पदेषु भगवता साध्य (परा)।

**भक्तेः वैविद्धम्-**

भक्तिवादस्य कदा आविर्भावोऽभवत् तस्मिन् विषये अस्मासु ऐक्यमतं नास्ति। अनेके जनाः चिन्तयन्ति यत् ख्रीष्टधर्मस्य प्रभावेन भारते भक्तिवादस्य प्रथमोन्मेषो जातः। तेषां मतानुसारेण महाभारतस्य शान्तिपर्वणि श्वेतद्वीपकथायां प्राचीनकाले भारतवर्षेण सह प्रतीचस्य सम्बन्धः प्रकाशितो जातः। तेन कारणेन प्रतीच्यधर्मस्य प्रभावेन अस्मिन् भारते कृष्णतत्वभक्तिवादयोः उद्भवो अभवत् ।

भक्तिवादः ख्रीष्टधर्मात्पूर्वमासीत् तस्मिन् विषये पाणिनिना तस्य व्याकरणसूत्रे उल्लेखितं यत् 'वासुदेवार्जुनाभ्यां वुन्' एतेन सूत्रानुसारेण वासुदेवं प्रति यस्य भक्तिः अस्ति, अस्मिन् अर्थे वासुदेव-अर्जुनयोः शब्दयोः वुन् प्रत्यययोजनेन वासुदेव-अर्जुनयोः इति पदद्वयस्य उत्पत्तिः भवति। अस्मिन् प्रसङ्गे अध्यापक हेमरायचौधुरीमहोदयेन उक्तम्-

"Since Panini probably flourished in the 5th century B.C. the Bhagavata (Vasudevaka) sect must have arisen before that time..... 'anurakti' for one who is identified with Visnu-Narayana as early as the TaittiriyaĀranyaka (X.1.6) and receives the epithets Bhagavata and Deva-deva in recards of the second century B.S. is hardly distinguishable from Bhakti in the religious Sense as defined by Sändilya. " [26](2)

ऋग्वेदस्य मन्त्रेभ्यः भक्तिवादस्य जन्म भवति । परन्तु ऋग्वेदे भागवतप्रीत्यार्थे भक्तिः इति पदस्य उल्लेखो नास्ति । भक्तिशब्दस्य मूलोपादानानि अग्नि इन्द्र-वरुणादिदेवान् उद्देश्य विरचितमन्त्रेषु उपलभ्यते यत्र ईश्वरप्रेम्णः सम्पर्को ध्वनितो भवति । यः अग्नेः उपासकगृहस्य पुरोहितः, तेन स्वस्य मङ्गललाभाय यज्ञसम्पादनं कृतम्। केनचित् अग्निना उपासकस्य समीपे पुत्ररूपेण प्रतीयते, कदापि पितुः इव उपासकाय इप्सितद्रव्यं दीयते । इन्द्रेण उपासकस्य गृहे सोमरसपानार्थम् आगम्यते, यद्वत् इन्द्रः उपासकानां समीपे प्रियजनः, तद्वत् नार्य्या समीपे तासां पतिः। वायुदेवः उपासकानां समीपे पितृभातृभावं त्वं प्रदर्शयति ।

[21] श्रीमद्भागवत्गीता 62/18

[22] श्रीमद्भागवत्गीता 66/18

[23] गीता 8/15

[24] गीता 18/54

[25] गीता 18/68

[26] Materials for the study of the early history of the vaisnava sect,30

एतेषु मन्त्रेषु अपि च एतादृशेषु अन्यमन्त्रेषु देवताभिः सह उपासकस्य यः स्नेहसम्बन्धो ध्वनितो भवति सः भागवत्भक्तिमूलकग्रन्थे वर्णिताभिः देवताभिः सह मानवानां प्रेमसम्बन्धात् किमपि भिन्नो नास्ति। भक्तानां समीपे भगवान् केवलं बन्धनस्वरुपः न, अपि तु भक्तानां प्रेम्णः आश्रयः। भगवता सह भक्तस्य सम्पर्कः प्रीत्यात्मकः भवति, तस्मिन् विषये पूर्वे आलोचितमस्ति। ऋग्वेदस्य मन्त्रेषु देवताभिः सह मानवानां प्रीत्यात्मकसम्बन्धः प्रतिध्वनितोऽस्ति, तेन भक्तिवादस्य परिपोषणं जातम् इत्यस्मिन् विषये कोऽपि सम्बन्धः नास्ति । अतः भक्तिवादस्य प्रवर्तकाः भारतीयाः सन्ति तस्मिन् विषये कोऽपि मतभेदः नास्ति, अपि च भक्तिवादस्योपरि कस्यापि अभारतीयतत्त्वानां प्रभावो नास्ति।

उपनिषदि अपि भक्तिवादस्य कथाः उल्लिखिताः सन्ति। परन्तु अधिकांशोपनिषत्सु ज्ञानमार्गस्य प्राधान्यं दृश्यते। विभिन्नजनानां मतानुसारेण भक्तिवादस्य प्रधानोत्सः उपनिषद्। तैः चिन्तितं यत् यदा मानवानां चित्तः बहुदेवताषु एकां देवतां प्रति आकृष्टं भवति । अपि च तस्याः देवतायाः ध्यानं कृत्वा देवतया सह एकात्मतां साधयति। तदा येषां भक्तानां चित्तेषु भक्तेः उदयो भवति। एतेन कारणेन एकदेवतात्मकोपनिषदि भक्तिवादस्य उत्थानस्य अनुकूलः अस्ति, बहुदेवतात्मकऋक्संहितायां भक्तिवादस्य अनुकूलं नास्ति । अस्य मतस्य यथार्थता सन्देहादीना, किमर्थम् इत्युक्ते ऋग्वेदे भक्तिवादस्य विषयस्योपरि आलोचितमस्ति । भक्तिवादस्य उत्थानस्य उपनिषदः उपासनाकाण्डस्य अवदानम् नैवस्वीकार्यम्। श्रद्धेयभाण्डाकरमहोदयेन अस्य भक्तिवादस्य उत्थानस्य प्रधानं कारणं इति मन्यते। श्वेताश्वरोपनिषदि भक्तिशब्दस्य प्रथमः प्रयोगः दृश्यते। यथा-

**"यस्य देवे परा भक्तिः यथा देवे तथा गुरौ।**

**तस्यैते कथिता ह्यार्थाः प्रकाशन्ते महात्मनः।।"**[27]

अस्मिन् अर्थे भक्तिशब्दस्य अर्थः अवगत्यः (सेवा)। कैवल्य गोलापतापनी च इत्यादि उपनिषद्सु उल्लेखितम् अस्ति, भक्तिना ईश्वरप्राप्तिः भवति। कठोपनिषद-श्वेताश्वरोपनिषत्सु भगवत्प्रसादस्य महिमा वर्णितः अस्ति। महाभारते पुराणे च भक्तिवादस्य क्रमविकासो भवति । यद्यपि महाभारतकथायां विभिन्नेषु क्षेत्रेषु जनजीवसम्बन्धविषये आलोचना वर्तते। तथापि शान्ति अनुशासनादि पर्वेषु विभिन्नस्थानेषु भक्तिवादस्य आलोचना अस्ति । अनुशासनपर्वणि अम्बया महादेवस्य स्तुतिः कृतः । अपि च तेनोक्तं हरभक्तिं विना संसारभयात् उत्तीर्ण न भवति। यथा-

**"मा वाहनीश्वर भक्तो भवानि भवनेऽपि शत्रुस्य।**

**वायम्बूभजोहपि सतो नरस्य दुःखक्षयः कृतस्तस्य।**

---

27 श्वेताश्वतरोपनिषदि 6/23

**भवति हि सुरासुरगुरौ यस्य न विश्वेश्वरे भक्तिः।।**

**अलम्यन्याभिस्तेषां कथाभिरप्यन्यधर्मयुक्ताभिः।**

**येषां न क्षणमपि रुचितो हरचरणस्मरणविच्छेदः।।**

**हरचरणनिरतमतिना भवितव्यमनार्जवं युगं प्राप्य।**

**संसारभयं न भवति हरभक्तिरसायणं पीत्वा।।”[28]**

महाभारते भक्तस्य स्वरुपः गृहीतारूपेण देवतानां स्वरूपः दातारूपेण च वर्णितः अस्ति। देवताः भक्तानां भक्तिना सन्तुष्ठाः भवन्ति, अपि च तेषां कृते वरप्रदानं कुर्वन्ति। यथा-

**"अनया चैव भक्त्या ते अत्यर्थं प्रीतिमाहनम्।**

**तस्मात् सर्वान् ददान्यद्य कामांस्त्रव यथेप्सितान्।।"[29]**

निष्कर्षः- एवं भक्तेः स्वरूप-वैविद्धयोः क्रमविवर्तनयोः वा विषययोः प्रमाणानि उपलभ्यन्ते। अतः भक्तिवादस्य उत्थानं प्राचीनभारते अभवत्, तस्मिन् विषये किमपि सन्देहो नास्ति।

**सन्दर्भग्रन्थसूची**

**संस्कृतग्रन्थाः**

1. खण्डेलवाल, श्री एस. एन. सौरपुराणम्वाराणसी, चौखम्बा सुरभारती,, 2013.

2. आचार्यः, रामभद्र संशोधितं सानुबन्थम् तथा च आचार्यः एस. महामहोपाध्यायैः एन्, विरचितया विस्तृत आंग्लभूमिकया सहितम् नारायण एस के डा मेलुकोट, संसत्-संशोधन-संस्कृत, श्रीमद्भगवद्गीताभाष्यम्, 2008

3. कुमारनई दिल्ली, सत्यम् पब्लिशिंग हाउस, पुराणनिर्माणाधिकरणम्, सत्यवान डॉ. .2011

4. शास्त्रीनई दिल्ली, नाग पब्लिशर्स, श्रीवायु महापुराणम्, कुटुम्बर. वी. प्रो,, .2002

5. शास्त्रीउत) श्रीमद्वाल्मीकीयरामायणम्, वेम्पटि कुटुम्ब प्रो. तरकाण्डम् (नाग पब्लिशर्सनई दिल्ली, (संस्करणम् य2) 2005, (संस्करणम्, म1) 1990

[28] म.अनु.पर्वः14/182-184

[29] म.अ.पर्वः14/240

6. शास्त्री आरण्यककाण्डम्) श्रीमद्वाल्मीकीयरामायणम्, वेम्पटि कुटुम्ब प्रो (किष्किन्धाकाण्डम्नाग पब्लिशर्सनई दिल्ली, 2005, (संस्करणम्. म1) 1990 (संस्करणम् य2)

**हिन्दीग्रन्था:-**

1. लाल, कन्हैया डा, रामचरितमानस का सौन्दर्यशास्त्रीय अध्ययन, कला प्रकाशन, वाराणसी, 2010

2. पोद्दारा, गोरखपुर, गीताप्रेस, श्रीरामचरितमानस, हनुमानप्रसाद,

3. त्रिपाठीसाधनाप्रेस, श्रीमहाभागवत उपपुराण, आचार्य मृत्युञ्जय, चौकाघाटवाराणसी... 2010

4. पुरोहितपुराणों में भ, सोहन कृष्ण डॉ, ारतीय संस्कृतिगोधपुर, राजस्थानी ग्रन्थागार.. 2007

5. वाजपेयीदिल्ली, अमर प्रिन्टिंग प्रेस, श्रीमद्भगवद्गीता, नत्रिभुव डॉ,,2008

6. गोयन्दकाशकाब्दः, गोरखपुर, गीताप्रेस, श्रीमद्भगवद्गीता, श्रीहरिकृष्णदास, 2073

7. प्रणीत (प्रथमखण्ड) श्रीमद्भागवत्महापुराण, महर्षि वेदव्यास, गीताप्रेस, गोरखपुर, 2071, शकाब्दः

ISARA INSTITUTE OF MANAGEMENT & PROFESSIONAL STUDIES




RESEARCH GATEWAY







AROGYAM ONLINE

PARIVARTAN PSYCHOLOGY CENTER






**भारतीय भाषा, शिक्षा, साहित्य एवं शोध**

**ISSN 2321 – 9726**

**WWW.BHARTIYASHODH.COM**

**INTERNATIONAL RESEARCH JOURNAL OF MANAGEMENT SCIENCE & TECHNOLOGY**

**ISSN – 2250 – 1959 (0) 2348 – 9367 (P)**

**WWW.IRJMST.COM**

**INTERNATIONAL RESEARCH JOURNAL OF COMMERCE, ARTS AND SCIENCE**

**ISSN 2319 – 9202**

**WWW.CASIRJ.COM**

**INTERNATIONAL RESEARCH JOURNAL OF MANAGEMENT SOCIOLOGY & HUMANITIES**

**ISSN 2277 – 9809 (0) 2348 - 9359 (P)**

**WWW.IRJMSH.COM**

**INTERNATIONAL RESEARCH JOURNAL OF SCIENCE ENGINEERING AND TECHNOLOGY**

**ISSN 2454-3195 (online)**

**WWW.RJSET.COM**

**INTEGRATED RESEARCH JOURNAL OF MANAGEMENT, SCIENCE AND INNOVATION**

**ISSN 2582-5445**

**WWW.IRJMSI.COM**

**JOURNAL OF LEGAL STUDIES,POLITICS AND ECONOMICS RESEARCH**

**WWW.JLPER.COM**